শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে ত্রিনৱতিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ত্রিনৱতিতমং দশকম্॥

## গুরুশিক্ষাৱর্ণনম্

বন্ধুস্নেহং ৱিজহ্যাং তৱ হি করুণযা
    ৎৱয্যুপাৱেশিতাত্মা
সর্ৱং ত্যক্ত্ৱা চরেযং সকলমপি জগ -
    দ্ৱীক্ষ্য মাযাৱিলাসম্।
নানাৎৱাদ্ভ্রান্তিজন্যাৎ সতি খলু গুণদো -
    ষাৱবোধে ৱিধির্ৱা
ৱ্যাসেধো ৱা কথং তৌ ৎৱযি নিহিতমতে -
    র্ৱীতৱৈষম্যবুদ্ধেঃ॥ **93.1**॥

ক্ষুত্তৃষ্ণালোপমাত্রে সততকৃতধিযো
    জন্তৱঃ সন্ত্যনন্তা -
স্তেভ্যো ৱিজ্ঞানৱত্ত্ৱাৎ পুরুষ ইহ ৱর -
    স্তজ্জনির্দুর্লভৈৱ।
তত্রাপ্যাত্মাত্মনঃ স্যাৎসুহৃদপি চ রিপু -
    র্যস্ত্ৱযি ন্যস্তচেতা -
স্তাপোচ্ছিত্তেরুপাযং স্মরতি স হি সুহৃৎ
    স্ৱাত্মৱৈরী ততোঽন্যঃ॥ **93.2**॥

ৎৱৎকারুণ্যে প্রৱৃত্তে ক ইৱ নহি গুরু -
    র্লোকৱৃত্তেঽপি ভূমন্
সর্ৱাক্রান্তাপি ভূমির্নহি চলতি তত -
    স্সৎক্ষমাং শিক্ষযেযম্।

গৃহ্ণীযামীশ তত্তদ্বিষযপরিচযে -
    ঽপ্যপ্রসক্তিং সমীরাৎ
ৱ্যাপ্তত্ৱঞ্চাত্মনো মে গগনগুরুৱশা -
    দ্ভাতু নির্লেপতা চ॥ **93.3**॥

স্বচ্ছঃ স্যাং পাৱনোঽহং মধুর উদকৱ -
    দ্বহ্নিৱন্মা স্ম গৃহ্ণাং
সর্ৱান্নীনোঽপি দোষং তরুষু তমিৱ মাং
    সর্ৱভূতেষ্ৱৱেযাম্।
পুষ্টির্নষ্টিঃ কলানাং শশিন ইৱ তনো -
    র্নাত্মনোঽস্তীতি ৱিদ্যাং
তোযাদিৱ্যস্তমার্তাণ্ডৱদপি চ তনু -
    ষ্ৱেকতাং ৎৱৎপ্রসাদাৎ॥ **93.4**॥

স্নেহাদ্ব্যাধাত্তপুত্রপ্রণযমৃতকপো -
    তাযিতো মা স্ম ভূৱং
প্রাপ্তং প্রাশ্নন্ সহেয ক্ষুধমপি শযুৱৎ
    সিন্ধুৱৎস্যামগাধঃ।
মা পপ্তং যোষিদাদৌ শিখিনি শলভৱৎ
    ভৃঙ্গৱৎ সারভাগী
ভূযাসং কিন্তু তদ্বদ্ধনচযনৱশা -
    ন্মাহমীশ প্রণেশম্॥ **93.5**॥

মা বদ্ধ্যাসং তরুণ্যা গজ ইৱ ৱশযা
    নার্জযেযং ধনৌঘং
হর্তান্যস্তং হি মাধ্ৱীহর ইৱ মৃগৱ -
    ন্মা মুহং গ্রাম্যগীতৈঃ।
নাত্যাসজ্জেয ভোজ্যে ঝষ ইৱ বডিশে

পিঙ্গলাৱন্নিরাশঃ
সুপ্যাং ভর্তৱ্যযোগাৎ কুরর ইৱ ৱিভো
সামিষোঽন্যৈর্ন হন্যৈ॥ **93.6**॥

ৱর্তেয ত্যক্তমানঃ সুখমতিশিশুৱ -
ন্নিস্সহাযশ্চরেযং
কন্যাযা একশেষো ৱলয ইৱ ৱিভো
ৱর্জিতান্যোন্যঘোষঃ।
ৎৱচ্চিত্তো নাৱবুদ্ধ্যৈ পরমিষুকৃদিৱ
ক্ষ্মাভৃদাযানঘোষং
গেহেষ্ৱন্যপ্রণীতেষ্ৱহিরিৱ নিৱসা -
ন্যুন্দুরোর্মন্দিরেষু॥ **93.7**॥

ৎৱয্যেৱ ৎৱৎকৃতং ৎৱং ক্ষপযসি জগদি -
ত্যূর্ণনাভাৎ প্রতীযাং
ৎৱচ্চিন্তা ৎৱৎস্ৱরূপং কুরুত ইতি দৃঢং
শিক্ষযে পেশকারাৎ।
ৱিডভস্মাত্মা চ দেহো ভৱতি গুরুৱরো
যো ৱিৱেকং ৱিরক্তিং
ধত্তে সঞ্চিন্ত্যমানো মম তু বহুরুজা -
পীডিতোঽযং ৱিশেষাৎ॥ **93.8**॥

হী হী মে দেহমোহং ত্যজ পৱনপুরা -
ধীশ যৎপ্রেমহেতো -
র্গেহে ৱিত্তে কলত্রাদিষু চ ৱিৱশিতা -
স্ত্ৱৎপদং ৱিস্মরন্তি।
সোঽযং ৱহ্নেশ্শুনো ৱা পরমিহ পরত -
স্সাম্প্রতং চাক্ষিকর্ণ -

ৎৱগ্জিহ্ৱাদ্যা ৱিকর্ষন্ত্যৱশমত ইতঃ
    কোঽপি ন ৎৱৎপদাব্জে ॥ **93.9** ॥

দুর্ৱারো দেহমোহো যদি পুনরধুনা
    তর্হি নিশ্শেষরোগান্
হৃৎৱা ভক্তিং দ্রঢিষ্ঠাং কুরু তৱ পদপ -
    ঙ্কেরুহে পঙ্কজাক্ষ।
নূনং নানাভৱান্তে সমধিগতমিমং
    মুক্তিদং ৱিপ্রদেহং
ক্ষুদ্রে হা হন্ত মা মা ক্ষিপ ৱিষযরসে
    পাহি মাং মারুতেশ ॥ **93.10** ॥

॥ ইতি শ্ৰীমন্নারাযণীযে ত্রিনৱতিতমং দশকং সমাপ্তম্ ॥